# શમ્ભુ સ્તોત્ર

નાનાયોનિસહસ્રકોટિષુ મુહુઃ સંભૂય સંભૂય તદ-
ગર્ભાવાસનિરન્તદુઃખનિવહં વક્તું ન શક્યં ચ તત .
ભૂયો ભૂય ઇહાનુભૂય સુતરાં કષ્ટાનિ નષ્ટોઽસ્મ્યહં
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શંભો દયામ્ભોનિધે .. ૧ ..
બાલ્યે તાડનપીડનૈર્બહુવિધૈઃ પિત્રાદિભિર્બોધિતઃ
તત્કાલોચિતરોગજાલજનિતૈર્દુઃખૈરલં બાધિતઃ .
લીલાલૌલ્યગુણીકૃતૈશ્ચ વિવિધૈર્દુશ્ચેષ્ટિતૈઃ ક્લેશિતઃ
સોઽહં ત્વાં શરણં વ્રજામ્યવ વિભો શંભો દયામ્ભોનિધે .. ૨ ..
તારુણ્યે મદનેન પીડિતતનુઃ કામાતુરઃ કામિની-
સક્તસ્તદ્વશગઃ સ્વધર્મવિમુખઃ સદ્ભિઃ સદા દૂષિતઃ .
કર્માકાર્ષમપારનારકફલં સૌખ્યાશયા દુર્મતિઃ
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શંભો દયામ્ભોનિધે .. ૩ ..
વૃદ્ધત્વે ગલિતાખિલેન્દ્રિયબલો વિભ્રષ્ટદન્તાવલિઃ
શ્વેતીભૂતશિરાઃ સુજર્જરતનુઃ કમ્પાશ્રયોઽનાશ્રયઃ .
લાલોચ્છિષ્ટપુરીષમૂત્રસલિલક્લિન્નોઽસ્મિ દીનોઽસ્મ્યહં
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શંભો દયામ્ભોનિધે .. ૪ ..
ધ્યાતં તે પદામ્બુજં સકૃદપિ ધ્યાતં ધનં સર્વદા
પૂજા તે ન કૃતા કૃતા સ્વવપુષઃ સ્ત્રગ્ગન્ધલેપાર્ચનૈઃ .
નાન્નાદ્યૈઃ પરિતર્પિતા દ્વિજવરા જિહ્વૈવ સંતર્પિતા
પાપિષ્ઠેન મયા સદાશિવ વિભો શંભો દયામ્ભોનિધે .. ૫ ..
સંધ્યાસ્નાનજપાદિ કર્મ ન કૃતં ભક્ત્યા કૃતં દુષ્કૃતં
ત્વન્નામેશ ન કીર્તિતં ત્વતિમુદા દુર્ભાષિતં ભાષિતમ .
ત્વન્મૂર્તિર્ન વિલોકિતા પુનરપિ સ્ત્રીમૂર્તિરાલોકિતા
ભોગાસક્તિમતા મયા શિવ વિભો શંભો દયામ્ભોનિધે .. ૬ ..
સંધ્યાધ્યાનજપાદિકર્મકરણે શક્તોઽસ્મિ નૈવ પ્રભો

દાતું હ્ન્ત મતિં પ્રતીપકરણે દારાદિબન્ધાસ્પદે .
નામૈકં તવ તારકં મમ વિભો હ્યન્યન્ન ચાસ્તિ ક્વચિત
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શંભો દયામ્ભોનિધે .. ૭ ..
કુમ્ભીપાકધુરંધરાદિષુ મહાબીજાદિષુ પ્રોદ્ધતં
ઘોરં નારકદુઃખમીષદપિ વા સોઢું ન શક્નોઽસ્મ્યહમ .
તસ્માત ત્વાં શરણં વ્રજામિ સતતં જાનામિ ન ત્વાં વિના
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શંભો દયામ્ભોનિધે .. ૮ ..
માતા વાપિ પિતા સુતોઽપિ ન હિતો ભ્રાત્રાદયો બાન્ધવાઃ
સર્વે સ્વાર્થપરા ભવન્તિ ખલુ માં ત્રાતું ન કેઽપિ ક્ષમાઃ .
દૂતેભ્યો યમચોદિતેભ્ય ઇહ તુ ત્વામન્તરા શંકર
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શંભો દયામ્ભોનિધે .. ૯ ..
.. શંભુસ્તોત્રં સંપૂર્ણમ ..